International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2025; 2(4): 130-133
© 2025 IJMH
www.themultijournal.com
Received: 11-08-2025
Accepted: 25-08-2025
Publish : 27-08-2025

**Gandhe.Rajeshwari**
Research Scholar,
Department of Agama,
NSU-Tirupati

**Correspondence:**
**Gandhe.Rajeshwari**
Research Scholar,
Department of Agama,
NSU-Tirupati

# श्रीपाञ्चरात्रागमे विष्वक्सेनसंहितायां प्रतिमादीनां लक्षणानि

**Gandhe.Rajeshwari**

**विष्वक्सेनं तथा तार्क्ष्यं भारद्वाजं कपिञ्जलम्।**
**वशिष्ठाजिमुनीन् वन्दे पाञ्चरात्रप्रवर्तकान्।।**

इह जन्मनि सर्वे मानवाः सुखमेव वाञ्छन्ति। तत्सुखमैहलौकिकं पारलौकिकमिति द्विविधम्। स्वर्गप्राप्तिः पुनरावृत्तिः मोक्षः अपुनरावृत्तिश्च। मोक्षप्राप्तये नैके उपायाः लोके विद्यन्ते। तेषु भक्तिप्रपत्ती मुख्यतमौ स्याताम्। भगवतः श्रीमन्नारायणस्य समाराधनं भक्त्या क्रियमाणेन भगवदनुकम्पां प्राप्नुवाम। ईदृशमारधनं बोधयति पाञ्चरात्रदिव्यशास्त्रम्। वैष्णवागमः वैखानसपाञ्चरात्रभेदेन द्विविधः। वैखानसं भगवतः विष्णोरंशत्वेन समुत्पन्नेन विखनमहर्षिणा उपदिष्टम्। विखनो मुनिः भृग्वत्रिकश्यप -मरीचेभ्यो चतुर्भ्यो महर्षिभ्यो वैखानसं शास्त्रमुपदिदेश। पाञ्चरात्रं भगवतः श्रीमन्नारायणस्यानुग्रह विशेषेण सार्धकोटिश्लोकैः महालक्ष्मीः चतुर्मुखः आदिशेषः वैनतेयः विष्वक्सेनः इति पञ्चेभ्यः उपदिष्टत्वात्पाञ्चरात्रमिति नामावाप। तदिदं पाञ्चरात्रं एकायनम्, मूलवेदः भागवतमिति च विशेषेण प्रथते। पाञ्चरात्रशब्दस्य निर्वचने मतभेदः वरीवर्ति। भाषाविज्ञानदृष्ट्या, निरुक्तकारदृष्ट्या, व्याकरणदृष्ट्या वा परिशील्यमाने मतभेदोऽयं स्पष्टतया बोध्यते। महान्तः आधुनिकाः अनुसन्धातारः विषयेऽस्मिन् बहुपरिश्रममकार्षुः।किञ्च संहितासु यानि निर्वचनानि लभ्यन्ते तान्येवास्मकं प्रमाणभूतानीति पाञ्चरात्रा –गमविदामाशयः एव शिरोधार्यः। तत्र बह्व्यः संहिताः पाञ्चरात्रागमशब्दनिर्वचने अग्रेसरा-स्सन्ति। विहगेन्द्रसंहितायां प्रथमपटले सप्तमश्लोके-

**आदौ कृतयुगे प्राप्ते केशवेन प्रसादिता ।**
**अनन्तो गरुडश्चैव विष्वक्सेनः कपालभृत् ।।**[1] इति

शास्त्रोत्पत्तिः विवृतः। श्रीप्रश्नसंहितायां द्वितीयाध्याये चत्वारिंशच्छलोके -

**रात्रिरज्ञानमित्युक्तं पञ्चेत्यज्ञाननाशकम् ।**
**तच्छास्त्रं पाञ्चरात्रं स्यादन्वर्थस्यानुरोधतः ।।**[2] इति ।

पुरुषोत्तमसंहितायां प्रथमाध्याये चतुर्थश्लोके

**भगवद्भक्तिरेव स्यात् भक्तानां मुक्तिकारणम् ।**
**तद्भक्तिबोधकं शास्त्रं पाञ्चरात्रागमं स्मृतम् ।।**[3]इति

ईश्वरसंहितायाम्-

**सुदर्शनाद्याः हेतीशाः पञ्चब्रह्मर्षिरूपताः ।**
**समुत्पन्नाः क्षितितले पौण्ड्रवर्धस्थलादिषु ।।**
**पञ्चायुधांशास्ते पञ्चशाण्डिल्यश्चौपगायनः ।**
**मौञ्जायनः कौशिकश्च भारद्वाजश्च योगिनः ।।**
**पञ्चापि पृथगेकैकं दिवारात्रं जगत्प्रभुः ।**
**अध्यापयामास यतः ततस्तन्मुनिपुङ्गवाः ।।**[4] इति

अहिर्बुध्न्यसंहितायाम्

**तत्परव्यूहविभवस्वभावादिनिरूपणम् ।**
**पाञ्चरात्राह्वयं तन्त्रं मोक्षैकफललक्षणम् ।।**[5] इति

श्रीमन्नारायणस्यावतारवैभवप्रतिपादकं मोक्षदायकं शास्त्रमेव पाञ्चरात्रमिति निरणायि। भगवता बादरायणेन श्रीमन्महाभारते - एकमेकं सांख्यं योगं वेदारण्यकमेव च ।

**परस्पराङ्गान्येतानि पञ्चरात्रं तु कथ्यते ।।**[6] इति ।

चत्वारि शास्त्राणि संभूयैकमिति पञ्चविधज्ञानसमाहारात् पाञ्चरात्रमिति संज्ञा विधत्ता ।

**पाञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्** इति कृष्णद्वैपायनवचनमपि द्योतयति शास्त्रस्यास्य महिमानम्। अनिरुध्दसंहितायाः द्वितीयेध्याये ऋषीणां संशयापनोदनार्थं भृगुणा-

**पाञ्चरात्रं महाज्ञानं नारायणसमीरितम् ।**
**पञ्चरात्रात्परं शास्त्रं न भूतो न भविष्यति ।।**
**आदित्यानां यथा विष्णुः रुद्राणां शङ्करो यथा ।**
**वेदानां सामवेदस्तु नराणां च नराधिपः ।।**[7] इति प्रोक्तम्।

कण्वसंहितायां चतुर्थेऽध्याये स्वयं भगवान् ऋषिभ्यः प्रति –

**रात्रं तु ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।**
**सदाचारात्मकं ज्ञानं स्वात्मनश्च परात्मनः ।।**
**जगतश्च विवेकेन ज्ञानमर्चात्मकं तथा ।**
**पञ्चप्रकारता यत्र समेत्य दृश्यते बुधैः ।।**[8] इत्युवाच।

पञ्च, रात्रि इति पदद्वययोजनेन पाञ्चरात्रमुत्पद्यते। रात्रिशब्दः **संख्यारात्रं क्लीबमिति**[9] सूत्रेण रात्र इति परिणमति। रात्रशब्देन ज्ञानमिति भगवतः श्रीमहाविष्णोः सान्निध्यप्राप्तिबोधकमाराधनाशास्त्रं ज्ञापयतीति हेतोः पाञ्चरात्रमिति कथ्यते । अत्र पञ्चशब्दः

**श्रीशेषपक्षीश्वरपद्मगर्भशेनेशमुख्यान् प्रतिबोधयन्तम् ।**
**श्रीपाञ्चरात्रागमशास्त्रमाद्यं विष्णुं संदाहं शरणं प्रपद्ये।।**[10]

इतिपञ्चेभ्यो भगवता श्रीमहाविष्णणुना उपदिष्टमिति शेषसंहितायां प्रोक्तम्।पाञ्चरात्रशब्दस्य विभिन्नार्थाः बह्वीषु संहितासु सन्दृश्यन्ते। विश्वमित्रसंहितायां पञ्चेन्द्रियाणि, शब्दादिपञ्चविषयाः अभिधीयन्ते। तेषां सर्वेषां ग्राहकाः नराः इति, पञ्चरान् मानवान् त्राणनहेतोः पाञ्चरात्रमित्युक्तम् ।

कृत्स्नं पाञ्चरात्रं प्रधानतया ज्ञान-योग-क्रिया-चर्यापादेन चतुर्थाविभक्तम्। ज्ञानपादे सृष्टेः स्वरूप -निरूपणम्, ब्रह्माण्डानां समग्रविवरणं वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धान् सम्पूर्णं विवृतम्। मुक्तेः स्वरूपविवरणं मुक्तिप्राप्युपायाः भूवनकोशस्वरूपनिरुपणम्।व्यूहस्वरूपनिधिः तन्महिमा इत्यनेके अंशाः निरूपिताः ।

द्वितिये योगपादे योगविभगः यमादिनां अष्टयोगाङ्गानां समग्रविवरणं योगशक्त्या भगवदाराधनं विधाय भगवदनुग्रहप्राप्तये मार्गाः, योगमहिम्ना अत्मसाक्षत्कारप्राप्तिः विविधसाधनमार्गाः सुष्ठु प्रोक्ताः। योगसाधनद्वारा अत्मज्ञानपूर्वककर्मानुष्ठानेन परमात्मोपसनशक्तिः तत्फलञ्च विवृतम्।

तृतीये क्रियापादे देवालयनिर्माणान्तर्गतकर्षणादिप्रतिष्टादारभ्य उत्सवान्तं तथैव उत्सव-क्रियाविशेषादारभ्य प्रोक्ताः।

चतुर्थे चर्यापादे देवालये प्रतिष्ठितानां मूर्तीनां मानादिनिरूपणम्, देवालये प्रतिष्ठोपकरणानां विविधानां वस्तूनां परिमाणनिरूपणम्, शिष्याचारलक्षणानि, देवालये सर्वविधक्रियाकलापेषु भक्तैः कर्माचारिभिः तथा अन्यैः आवर्षं क्रियमाणानां ज्ञाताज्ञातदोषाणं परिहारपूर्वकं निश्चितः प्रायश्चित्तविधिः संपूर्णतया निरूप्यते। पाञ्चरात्रसिद्धान्ते सर्वे ग्रन्थाः संहिता इति नाम्ना विद्योतन्ते। एवं तन्त्रमित्यपि व्यवहारः। इमाः संहिताः विभिन्नपण्डितानामभि-प्रायानुसारं पार्थक्यं दृश्यन्ते। तथापि 248 संहिताः इति पाञ्चरात्रकोविदैः परिगणिताः। तत्रापि सात्त्वतपौष्कजयाख्यसंहिताः रत्नत्रयमिति नाम्ना व्यह्रियन्ते। तासामपि विवरणभूताः ईश्वर-पाद्मपारमेश्वरसंहिताः प्रख्याताः। तथैव अहिर्बुध्न्यसंहिता, कपिञ्जलसंहिता, विहगेन्द्रसंहिता, विष्वक्सेनसंहिता, पुरुषोत्त-मसंहिता, विश्वामित्रसंहिता, भारद्वाजसंहिता इत्यादयः सुप्रसिद्धाः पाञ्चरात्रसंहिताः लोके पाञ्चरात्रस्य वैशिष्ट्यं प्रामुख्यं महत्त्वञ्च जगद्विख्यातं चक्रिरे।

**विष्वक्सेनसंहिता**

पाञ्चरात्रसंहितासु विष्वक्सेनसंहिता अन्यतमा वरीवर्ति। अस्याः संहितायाः प्रतयः MGO MLR 3702, MOL सूच्यां II द्वितीयसम्पुटे 38, श्रीरङ्गं शिङ्गमय्यङ्गारग्रन्थालयः 481 श्रीवैकुण्ठं श्रीपेरियतिरुवडि अय्यङ्गार इत्यादि स्थलेषु सम्पूर्णतया 26-30, 39 अध्यायाः तथा प्रायश्चित्तसंग्रहादि ग्रन्थेष्वपि उपलभ्यन्ते। अत एवास्याः संहितायाः समीचीनप्रकाशनमनेकप्रतीनां तुलनात्मकेना-ध्ययनेन क्रियत इति विश्वासेन प्रकाश्यते।

विष्वक्सेनसंहितायाः प्रामाण्यावसरे आधारभूताः इमाः संहिताः परिगण्यन्ते। यथा कपिञ्जलसंहिता नुसारं(53),त्रिपञ्चाशत्त-माइति(53/100),पाद्मसंहितानुसारंञ्चाशत्तमा(50/108), पुरुषोत्तमसंहिता नुसारं षड्विंशत्तमा(26/106), भारद्वाजसंहातानुसारं चतुःपञ्चाशत्तमा(54/101), मार्कण्डयसंहिता-नुसारं पञ्चविशत्तमा (25/91), विश्वामित्रसंहितानुसरं अष्टाविंशति(28/108), विष्णुतन्त्रसंहिता-नुसारं एकोनसप्ततितमा(69/154) इति। संहितेयं तत्त्वत्रयव्याख्याने श्रीमद्वरवरमुनीन्द्रेण, श्रीवेदान्तदेशिकेन, श्रीमल्लोकाचार्यैः श्रीमद्रामानुजाचार्यैरपि दृष्टान्तत्वेन स्वीकृता। अस्याः संहितायाः प्राचीनत्वं विशेषत्त्वमपि ऊहितुं शक्यते।

अस्याः संहितायाः प्रथमचतुष्टयाध्यायान्ते पञ्चदशाध्यायान्ते पूर्वभागः इति प्रोक्तत्वादपि अनेकेषु अध्यायेषूत्तरभाग इति सूचनया विभागद्वयेन स्यादित्यूह्यते। एकस्मिन् विभागे विष्वक्सेनस्य शचीपतेः, विभागान्तरे विष्वक्सेन नारदयोर्मध्ये सम्भावितसंवादरूपेण संहितेयं विद्यमाना द्योत्यते। अस्यां संहितायां ज्ञानभागबोधकभागाः नोपलभ्यन्ते। दीक्षायाः अपि भागाः नातिवस्तृततया वर्ण्यन्ते। 25, 26 अध्यायेषु पालिका, ध्वजोत्थापनमित्यादि सविस्तरविवरणं विशेषतया प्रदर्श्यते। अस्याः संहितायाः पूर्वोत्तरभागौ सम्मिश्र्याध्ययनेन तथानुसन्धानेन च पाञ्चरात्रशास्त्रजिज्ञासूनामत्यन्तमु -पकृतिर्भवेदिति विदुषैरभ्यदायि।

**प्रतिमालक्षणम्**

अस्मिन्नाध्याये मूर्तिभेद विषये विष्वक्सेनं प्रति नारदःपप्रच्छ। विष्वक्सेनः भगवदालये आरधनीयस्य विष्णोः प्रतिमा मुख्यतया परमात्मा वासुदेवः संकर्षणः प्रद्युम्नः अनिरुध्दश्चेति पञ्चप्रकारतया

विराजत इत्युवाच। एते पञ्चमूर्तयः आदिमूर्तयः इति कथ्यन्ते। ततः परं मत्स्य, कूर्म, वरह, नारसिंह, वामन, परशुराम, श्रीराम, बलराम, श्रीकृष्ण, कल्कि, विष्णुः इति दशविधमूर्तयः विशिष्यन्ते। एवं केशवः, नारायणः, माधवः, गोविन्दः, वामनः, श्रीधरः, ऋषिकेशः, पद्मनाभः, दामोदरः इति द्वादशमूर्तयः विशेषतः समाराध्याः। तदनु श्रिया सहितमूर्तयः अपि अन्ये विलसन्ति, ते यथा विश्वरूपी, यज्ञमूर्ति,वेदमूर्ति इति मूर्तित्रयमकत्रावधेयम्। श्रियादि मूर्तीविशेषेषु श्रीः, पुष्टिः, मेधा, सरस्वति, दुर्गा,विघ्नेश इति षड्रूपाणि कीर्तितानि। तदनु तासां मूर्तीनां मानादि भेदविषयः सूच्यते। जालान्तर्गत- रवेरंशुमान ज्योत्स्ना इत्युच्यते। ज्योत्स्नाष्टकं रेणुः रेणोरष्टकं तिलं, तिलाष्टकं यवः, यवाष्टकं अंङ्गुळीः इत्यभिधीयते।अत्र अङ्गुळयाः मानविषये पार्थक्यं विद्यते। यथा अष्टौ यवाः वा व्रीहित्रयमुच्छ्रायं अङ्गुळिमानं भवेत्। तदनु मध्यमङ्गुळिमानं तु करमध्यस्थ मध्यं व्रीहिपञ्चसमं, मध्यपर्वसमावृत्तिः भवेत्। देशिकाङ्गुळिं तु करमध्यस्थ सार्धाङ्गुळिमानं कथ्यते।एवं विग्रहमाने त्रिप्रकारकानि मानानि कथितानि। उपर्युक्तेषु त्रिषु यथेष्टं मन्दिरे विमानस्य बेरस्य वा मानं स्वीकुर्यात्। तथैवाष्टमङ्गुळानां स्रुक्स्रुवयोः वेद्याः विभिन्नमण्डपानां कुण्डानां एवमादिषु निर्माणावसरे मानादिनां प्रस्तावः मुख्यः। तत्रापि अंगुल,मानांगुल,मात्रांगुल,शुध्दमात्रांगुलादीनां भेदाः मतिमान् ज्ञेयाः। अष्टमाङ्गुळादीनां मानावसरे मध्यमात्राङ्गुळानि मुख्यतया ग्रह्यानि। द्वादशांगुलमानं तालं, तालद्वयं हस्तमिति त्रिधा भवति। तदनु प्रतिमालक्षणं निरुप्यते। मूलबेरस्य मानं विमानस्य गर्भालयस्य गर्भालयद्वारमानेनार्धं भवेत्। मूलप्रासादविस्तारतः वा बह्यप्रमाणताधं श्रेष्ठमिति तदर्धं मध्यमं तदर्धा -धममिति च प्रोच्यते। प्रासादस्य द्वारमानं द्वारादपि पादादिकं द्वारसमं मध्यमं द्वारपादहीनमधममिति च उच्यते। गर्भालयस्य मानविषये प्रतिमायाः मानमपि मुख्यमेव। त्रिपादद्वयदीर्घतमा प्रतिमा उत्तमा, पञ्चमभागं मध्यमा गर्भगेहस्यार्धतुंगमधमा चेति ज्ञायते। गर्भमानावसरे चित्रं, अर्धचित्रं, चित्राभास-मिति त्रिधा वर्तते। वस्तुतः प्रतिमा कालयोगप्रमाणेन कर्तव्यः अतः चित्रार्धचित्र-चित्राभासरूपेण त्रैविध्यं दृश्यते।तदुक्तं-

**कालायोगप्रमाणेन कर्तव्या प्रतिमा शुभा।**
**चित्रं चाप्यर्धचित्रं च चित्राभासं तथैव च।।**
**त्रिविधं प्रतिमाकर्म शास्त्रज्ञाः संप्रचक्षत्।**
**दृश्यतेऽवयवा यत्र प्रतिमायां समन्ततः।।**[11]

मानोन्मानप्रमाणादिभेदेन यो प्रतिमा निर्मीयते सा चित्रमिति, शिलायाः पृष्टभागाः नैव दृश्यते। मानप्रमाणसंयुक्ता सा उत्तमा, अर्धचित्रं, आलेख्यरूपेण लिखितापि मानप्रमाणसंयुक्तचित्राभसेति उत्तमं चित्रं, मध्यमं अर्धचित्रं, आलेख्यं अधममिति प्रतिष्ठाक्रमे प्रोक्तम्।

प्रतिमाकर्माणि अदौ प्रतिमायाः मानोन्मानानि निरुप्यन्ते। तत्रादौ बेरस्य उत्सेधः त्रिधा कृत्वा आद्यभागं पीठस्य उत्सेधसमं, आसनस्य चतुर्भागेषु एकभागं स्थानकस्य समं उच्छ्रायं भवेत्। मूलबेरस्य पादयोः स्थापनार्थं पादपद्मं अष्टपत्रैर्विराजितं कर्णिकायुतं द्वारस्य पादांशविस्तारं तावतैव उत्सेधसंयुतं च, वृत्तरूपनालं पद्माकृतिः चतुरस्रेण विद्यमानं स्यात्। विशिष्य वृत्तस्य शिवः इति चतुरस्रं पितामहः इति च उच्यते। तदनु नाहहस्तमानं उच्यते। स्थानकस्य मानं उपरियुक्ततया विद्यते। आसनबिम्बस्य मानं गर्भद्वारस्य युगांशं पादपद्ममुच्छ्रायं आयामविस्तारः पूर्वोक्तमानेन उच्यते। मानमिदं यानस्य शयनस्य वा नैव कुर्यात्। एवंरूपेण स्थानक, शयन, आसनबिम्बानां मानानि निरूपितानि। तदनु कर्मार्चायाः स्वरूपं उच्यते। कर्मार्चायाः कौतुकबिम्बमिति नामान्तरम्। मूलबेरस्य उत्सेधे प्रथमभागं अर्थात् सार्धभागं श्रेष्ठमिति भूतभागं मध्यमं भागस्य भागार्धं अधममिति त्रिधा कौतुकबेरमानलक्षणानि उच्यन्ते। मूलबेरायतस्यार्धे भागैकभागं उत्सवप्रतिमा तत्रार्धभागं स्नपनस्य तद्गुणांशे अर्धभागे बलिबेरस्योच्छ्रायं भवेत्। कर्मार्चायाः प्रमाणं उक्तलोहैः नाम सुवर्णादिभिः निर्मीयमाणा कर्मार्चा पुण्यदा, अनुक्तलोहैः कृता अशुभा इति ज्ञेया। बलिबिम्बलक्षणे वैविध्यं वर्तते। चतुर्विंशत्यङ्गुळोत्सेधा अथवा अष्टादशाङ्गुलमानं षोडशं द्वादशं अष्टाङ्गुळं वा उत्सेधं बलिबिम्बं प्रकीर्त्यते। विशिष्य एकादशाङ्गुळायामं अष्टाङ्गुळमुत्सेधं वा उत्तमबलिबिम्बमिति एकादशाङ्गुलोत्सेधं मध्यमंमष्टाङ्गुळममिति चोच्यते। स्नपनबिम्बमपि पूर्वोक्तमानेनैव भवेतीति शास्त्रनिश्चयः। मूलबिम्बा-दारभ्य बलिबिम्बान्तं रथकारेण शिल्पिना वा हीनमानेन नैव निर्मीयात्। मूलबेरस्य त्रिभागैकभागः उत्सवप्रतिमा तदर्धं स्नपनप्रतिमा कारयेत्। इमानि बिम्बानि सर्वाणि विधिप्रोक्तविधानेन विशेषाचारैः सह यथायोगं समार्चयेत्। एवं देवालये समर्चयिमानानां विग्रहाणां मानानि कथितानि।

सम्प्रति स्वार्थार्चाबिम्बानां लक्षणानि निरूप्यन्ते। इमानि बिम्बानि लोहज,मणिज,राजत,ताम्र, कनकानि श्रेष्ठानीति गीर्यन्ते। विशिष्य विप्रक्षत्रिययोः स्वर्णज, वैश्यानां राजतताम्रके वा प्रतिमाः निर्माणार्थं लोहाः प्रोक्ताः। रत्नजप्रतिमाः तेजोवैशिष्ट्येन सौम्याः आग्नेयाः समाश्चेति त्रिप्रकारकाः। आद्या शशिकान्तमयी,सौम्या, सूर्यकान्तमयी परा, स्फटिका समाचेति प्रोक्ता। उत्तरापेक्षया पूर्वपूर्वा विशिष्टा प्रोक्ता। मणिना निर्मितं बिम्बं अङ्गुलत्रयमानेन भवेत्। एवमेव अन्यानां बिम्बानां लक्षणानि समन्ततः संसूच्यन्ते। कर्मार्चाबिम्बादीनां उत्तमादिभेदेन त्रैविध्यं यथा दृश्यते तथैव आत्मार्थबिम्बा -नामपि मानानि ज्ञातव्यानि। चित्रनिर्माणबिम्बेषु फलके, पटे, कुड्ये लिखितानां लक्षणानि कर्मार्चाबिम्ब सदृशानीति ज्ञातव्यानि। तदनु दारुरूपबिम्बविषये कश्चिद्वैशिष्ट्यं दृश्यते। क्रमुक, पालश, बिल्व, खादिर, उदुम्बर, वकुल, पनस, द्रुमादि वृक्षविशेषैं-लब्धकाण्डेन अङ्गुळद्वयघनं चतुराङ्गुलमायतनं चतुरस्रं वृत्तं वा मेखला त्रययुक्तमानेन दारुबिम्बं विनिर्मयेत्। तस्योपरि अष्टदलपद्मपत्रं द्वादशदलैः शोभायमानकर्णिका च प्रकल्पनिया । तस्मिन् कर्णिकाग्रे नवरत्नसदृशानि पटलानि प्रकल्पनीयानि। कर्णिकाग्रे तथा पटलेषु देवदेवं पुरुषोत्तममात्मार्थयजनार्थं समावाह्य प्रपूजयेत्।

**ध्रुवबेरादिविग्रहलक्षणानि**

विभिन्नसंहितासु विशेषेण व्याख्यातानि। विशिष्य श्रीपुरुषोत्तम-संहितायामष्टमाध्याये सम्यक् विवृतम्। बेरमिति विग्रहस्य नाम। भगवतः विग्रहस्य देवालये पञ्चविधाः मूर्तयः स्वीक्रियन्ते। गर्भालये विग्रहस्य ध्रुवबेरमिति नाम। तत्स्थाने पूजार्थं कल्प्यमानस्य कौतुकबेरमिति बहिः ग्रामप्रदक्षिणादिषु सञ्चारणार्थो-पयुक्तस्य उत्सवबेरमिति, अभिषेकार्थं स्नपनमूर्तिरिति, बलिहरणार्थं बलिबेमिति कथ्यते। एवंरीत्या तत्तत्कर्मानुगुणमेकस्मिन् देवालये

भगवन्मूर्तिः पञ्चधा परिकीर्तितः विग्रहनिर्माणं आलयमानं, द्वारमानं वा यजमानविभवानुसारमिति त्रिप्रकारकः। यथोक्तम्-

**अत: सर्वं प्रवक्ष्यामि विग्रहाणां च लक्षणम्।**

**आलयस्य प्रमाणेन कुर्याद्वारप्रमाणत:।।**[12] इति।

गर्भालयमानेन विग्रहमानमुच्यते। गर्भालयमानानुसारं गर्भायामं नवधा विभज्य द्रव्यमानद्वारमानेन नवमभागेन मूलबेरनिर्माणं कर्तव्यम्। गर्भालयद्वारमानं पादन्यूनत्वेन विभज्य द्वारमानार्धं तदर्धं वा इति द्वारमानानुसारं मूलविग्रहं निर्मातुं शक्यते। तृतीयं यजमानमानं, यजमानसमं, यजमानस्य नेत्रान्तं चुबुकान्तम् अन्याङ्गमानं वक्षोजान्तं हृदयसममिति वा सप्तभिः प्रमाणैरपि विग्रहनिर्माणं कर्तुं शक्यते। इदं विग्रहनिर्माणमागमोक्तविधानेन शिल्पिना कुर्यात्।

**मानाङ्गुळादीनां मानानि**

ध्रुवबेरलक्षणं निरूप्य ततो अङ्गुल्यादिमानविधिरुच्यते। अष्टानाम-णुरेणूनां समुदायमेकं सर्षपमिति, अष्टसर्षपसमुदायमेकं तिलमिति, तिलाष्टकयुतमेकं यवमिति, यवाष्टकमेकं तिर्यगङ्गुलं, मानाङ्गुमिति च कथ्यते। मध्यमाङ्गुलिमध्यभागस्य यत्तिर्यङ्मानं भवति तन्मात्राङ्गुलमिति कथ्यते। यदङ्गुष्ठवलयार्थं तथाऽष्टार्धमुन्नतं भवति तद्देहलब्धाङ्गुलमिति कथ्यते। यथा-

**अत:परं प्रवक्ष्यामि अङ्गुळस्य प्रमाणकम्।**
**अणुरेणुभिरष्टैश्च सर्षपं विधीयते।।**
**सर्षपैरष्टभिश्चैव तिलमेकं विधीयते।**
**इति मानाङ्गुळं प्रोक्तं मात्राङ्गुळमिदं श्रुणु।**
**मध्यमाङ्गुळिमध्यस्य ऊर्ध्वं पर्वस्य तिर्यगम्।।**
**मात्राङ्गुळं च द्विविधं देहलब्धाङ्गुळं तत:।**
**अङ्गुष्ठवलयार्धं च अष्टार्धं च तथोन्नतम्।।**
**इदं च द्विविधं प्रोक्तं सर्वशास्त्रेषु निश्चितम्।**

मानाङ्गुलमानमनुसृत्यैव देवालये मण्डपगोपुरादीनि, मात्राङ्गुल-मानमनुरुध्य कुण्डानि, कूर्चयः, सृक्स्रुवौ, इध्मम्, यागपात्राणि निर्मीयन्ते। देहलब्धाङ्गुलसमं सर्वदेवताविग्रहाश्च निर्मीयन्ते। आलयद्वारसमं यजमानमानसमं वा विग्रहं कुर्यात्। विग्रहसव्यहस्तस्य देहलब्धाङ्गुलमानानुरोधेन विग्रहनिर्माणार्थं पादादारभ्य केशान्त-मष्टोत्तरशतमङ्गुलपरिमितं स्यात्। द्वादशाङ्गुलानि एकतालमि-त्युच्यते। नवतालमानेन विग्रहानि निर्मीयन्ते। विग्रहमानं नवताल-मित्युक्ते अष्टोत्तरशताङ्गुलानीतिसारांशः।

भगवतः विग्रहस्य लिङ्गं यावदर्धशरीरमिति, ऊर्ध्वभागोधोभागश्च समानत्वेन स्यात्। लिङ्गस्थानस्योर्ध्व भागः ऊर्ध्वकायमिति व्यवह्रियते। इदञ्च लिङ्गादारभ्य नाभ्यन्तं, नाभेरारभ्य हृदयान्तम्, हृदयादारभ्य चुबुकान्तम्, चुबुकादारभ्य शिरोजान्तञ्च प्रत्येकं समानमानत्वेन चतुर्था विभक्तम्। कर्णौ नासिका, नाशिकासमं नेत्रम्, नेत्रसमं वक्त्रम् वक्त्रसमं कण्ठः मेहनञ्चावयवाः चतुरङ्गुला-यामविस्तारं कल्पनीयाः। मेहनसमं वृषणानि, स्तनमध्यञ्च दशांगुलं भवेयुः। अधोभागे जानू, हस्तौ जान्वन्तम्, नाभिसमं बाहूमध्यमं बाहूमध्यसमं मणिबन्धेन, मणिबन्धमानं पाणितलं नखान्तं च कारयेत्। अङ्गुलत्रयमानेनोन्नतं, मध्यमांगुलं पवित्रसमं सलक्षणसमन्वितं माषप्रमाणन्यूनं कुर्यात्। कनिष्ठिकाद्विमाष-समन्वितामेवमंगुष्ठं माषत्रयं न्यूनं निर्मीयात्। मेखलात्रयप्रमाणे-नाङ्गुलत्रयमानेन पादमध्याङ्गुलमवशिष्टानाङ्गुलानां बिम्बा-नुरोधेन शिल्पिना निर्मीयात्। एवमूर्ध्वमधोभागस्थानामवयवानां मानविधानमुद्दिश्योक्तम्।

**बिम्बावयवलक्षणानि**

मस्तकमध्यभागः नेत्रस्थानमिति उच्यते। श्रोणी, ललाटम्, कूर्मपृष्टवत्कल्पनीयाः। कर्णौ-नेत्रे-नासिका-जानू, गूल्फौ, कटी, भुजौ, बाहूमूले, वृषणौ, चुबुकम्, ओष्ठौ, मणिबन्धम्, भ्रूयुग्मं, कुचे चावयवाः प्रत्येकमादिसमं कुर्यात्, ध्वजहस्तौ भुजयोः समानत्वे-नायुधाः नेत्रसमं निर्मीयासुः।

अथ तावद्बिम्बस्य ऊर्ध्वमनुसारमासनस्योन्नतिं कुर्यात्। नासादिचुबुकान्तं द्विगुणं मुकुटमानं भवेत्। गर्तस्थूपीमुपयोगानुसारं कुर्यात्। देव्यादिबिम्बानां मानान्युद्दिश्योच्यन्ते। देवीबिम्बमानानि भगवद्विग्रहना- सान्तं चेदुत्तमबिम्बानीति, ओष्ठान्ताश्चेद्मध्यमानि, चुबुकान्ताधमा इति परिगण्यन्ते। देवीबिम्बं चतुर्हस्त -युतासीनं स्थितं द्विभुजाभ्यां नीर्मीयात्। भगवद्विग्रहस्य वामभागे स्थितानां देवीबिम्बानां दक्षिणहस्ते कमलं वामहस्तं लम्बं च भवेत्। विष्णुबिम्बयोः पार्श्वभागे देव्यादिप्रतिमाः स्थापनीयाः। आलयान्तरे स्थाप्यमानायाः राज्यलक्ष्म्याः चतुर्भुजाः, चतुर्भुजेषु द्वयोः वरदाभयहस्तोः सव्यापसव्य हस्तयोः कमले भवेताम्। तां प्रतिमां पद्मपीठे संस्थापयेत्।

**उपयुक्तग्रन्थसूची (Bibleography)**

1.अष्टाध्यायी - आर्.जे.त्रिपाठी-चौखाम्भा संस्कृतप्रचुरणालयः – वरणासी 1995
2.अनिरुध्दसंहिता - ए.श्रीनिवास अय्यङ्गर् – मैसूर् -1956
3.अहिर्बुध्न्यसंहिता - देवशिखामणि रामानुजाचार्यः – अडयार्- चेन्नै -1916
4.ईश्वरसंहिता - वि.स्वामिनाथनः, पि.बि. अण्णङ्गराचार्यः1968 स्रमुक्तवलीसिरीस् -काञ्ची1923
5.पुरुषोत्तमसंहिता – पि. सीतरामाचार्याः-पाञ्चरात्रपरीरक्षण सभा– भद्राचलम् -1931.
6.महाभारतम् - वि.एस्. सूक्थङ्कर्, बल्वक्कर्क् भगवान् व्यासः शान्तिपर्वः Vol.16 Part-B Bhandarkar Oriental Research institute. पूणे -1954
7.विष्वक्सेनसंहिता- लक्ष्मीनरसिंहभट्टः - राष्ट्रियसंस्कृतविद्यपीठम् - तिरुपति-1972
8.विहगेन्द्रसंहिता- वडोदरा प्राच्यविद्यासंस्था – गुजरात् - 1963

**सन्दर्भाः**

1. विह.सं. 1.5
2. श्रीप्रश्न.सं 2.33
3. पुं.सं 1.4
4. ई.सं2.22-24
5. अहि.सं.1.18
6. महा.भा.12.336.76
7. अनि.सं.1.33
8. कण्व.सं.2.22,23
9. पा.सू.
10. शेष.सं 1.13
11. विष्व.सं(10.31-32)
12. पु.सं. 8-9